विना भौवादिकधमतिवत् (924) ज्ञेयानि । [1]आमनन्-ती, [2]व्यत्यामनमानः, [3]निम्नम्, [4]द्युम्नम्, [5]सुम्नम्, [6]आम्नायः इतीमानि रूपाण्यस्येति विशेषः ।

(1321) "म्रक्ष म्लेच्छने" (X-चुरादिः-1662. अक. सेट्. उभ.)

'म्लेच्छनम्=अपशब्दनम् ।' इति **धातुवृत्तिः** । 'म्रक्ष रोषे' इति चान्द्रसम्मतः पाठ इति क्षीरतरङ्गिणीतो ज्ञायते ।

'म्रक्ष च्छेदने' इत्यपि क्वचित्पठ्यते—इति **मा. धा. वृत्तिः** ।

'म्लेच्छने म्रक्षयेत्, [7]म्रक्षेत् संघाते—॥' (श्लो. 171) इति **देवः** ।

म्रक्षकः-क्षिका, मिम्रक्षयिषकः-षिका ; म्रक्षयिता-त्री, मिम्रक्षयिषिता-त्री ; इत्यादीनि समस्तान्यपि रूपाणि चौरादिकपक्षयतिवत् (956) ज्ञेयानि । [8]अनयम्रक्[B]-म्रक्षौ-म्रक्षः ।

---

1. शतरि, शपि 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमन—' (7-3-78) इत्यादिनाऽस्य **मना**देशे पररूपे च रूपमेवम् ।
2. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति शानचि, शपि **मनादेशे** रूपमेवम् ।
3. नीचभावमभ्यस्तीति **निम्नम्** । 'सुपि—' (3-2-4) इति योगविभागात्, 'आतश्चोपसर्गे' (3-1-136) इति वा कप्रत्यये, '**आतो** लोप इटि च' (6-4-64) इत्याकारलोपे च रूपमेवम् । अत्र **धातुवृत्तौ** तु—"—'आतोऽनुपसर्गे कः' (3-2-3) इति वा कः । नेर्नीचभाववचनत्वेन मन्य (न ?) त्यर्थस्याविशेषणान्न तं प्रतीहोपसर्गत्वम् ।" इत्युक्तम् । तदिहावधेयम् ।
4. दिने आम्नायते इति **द्युम्नम्** । द्युशब्दो दिनवचनः । अत्रापि कप्रत्यये रूपम् ।
5. सुतरामाम्नायते इति **सुम्नम्**=सुखम् । 'घञर्थे कविधानम्—' (वा. 3-3-58) इति घञर्थे कप्रत्यये रूपम् ।
6. आ=समन्तात् म्नायते इति **आम्नायः**=वेदः । घञि '**आतो** युक्—' (7-3-33) इति युगागमे च रूपमेवम् ।
7. **देव**श्लोकदर्शनेनास्य भ्वादिषु '**म्रक्ष संघाते**' इति पाठः संमत इति ज्ञायते । परं तु सर्वत्र धातुपाठेषु भ्वादिष्वस्य **मृक्ष** इत्येव पाठ उपलभ्यते । **मा. धा. वृत्तौ** तु चुरादिषु **म्रक्ष**धातुप्रस्तावे '**म्रक्षति** इति संघाते शपि ।' इत्युक्तम् । **धातुवृत्ता**वेव भ्वादिषु **म्रक्ष** इत्येव पाठो दृश्यते । ईदृशेषु स्थलेषु कतमः पाठः सर्वसम्मत इति दुर्निरूपं भवति ।
8. क्विपि संयोगान्तलोपे रूपमेवम् ।

A. 'सोऽजुहोत् कृष्णवर्त्मानम् **आमनन्** मन्त्रमुत्तमम् ॥' भ. का. 17-30.

B. 'धर्मेतरम्यग् **अनयम्रगयं** हि राजा ।' धा. का. 3-30.